**CLASS : 12th** (Sr. Secondary) **Code No. 205**

**Series : SS/Annual-2023**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घंटे]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **15** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*

- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***सामान्य निर्देश :***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



Downloaded from cclchapter.com

## खण्डः – 'क'

### (अपठित-अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नांकितप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत -

कस्मिंश्चित् ग्रामे जयसुन्दरः नाम युवकः स्वपत्न्या सह वसति स्म। सः प्रतिदिनम् आखेटे रतः। सः वने विचरतः बहून् पशून् हतवान्। तस्य अनेन पशुहिंसाजन्येन कार्येण पत्नी नितरां खिन्ना अभवत्। सा धर्मपरायणा सुशीला च नारी आसीत्। तस्यै पतिकार्यं सर्वथा नारोचत। सा वारं वारं पशुहिंसाकार्यं त्यक्तुं तं बोधयति स्म-यत् एतत्कार्यं त्यक्त्वा पशवः रक्ष्यन्ताम् इति।

***प्रश्ना :-*** $5 \times 2 = 10$

(क) जयसुन्दरः कया सह वसति स्म ?

(ख) जयसुन्दरः कस्मिन् कार्ये रतः ?

(ग) जयसुन्दरस्य पत्नी किमर्थं खिन्ना अभवत् ?

(घ) जयसुन्दरस्य पत्नी स्वपतिं बोधयितुं किमवदत् ?

(ङ) 'तस्यै' इति पदे का विभक्तिः अस्ति, किमर्थं च।

## खण्डः – 'ख'

### (रचनात्मकं-कार्यम्)

**2.** ***एकं*** लघुनिबन्धं संस्कृतभाषया रचयत - 6

(क) मम प्रियः कविः,

(ख) अनुशासनम्,

(ग) स्वामी विवेकानन्दः।



Downloaded from cclchapter.com

## खण्डः – 'ग'

### (संस्कृत-साहित्य-परिचयः)

**3.** महाकविकालिदासस्य ***अथवा*** श्रीभट्ट मथुरानाथशास्त्रिणः संक्षिप्तपरिचयं हिन्दीभाषया लिखत। 4

**4.** ईशावास्योपनिषद् ***अथवा*** पाषाणीकन्याग्रन्थस्य संक्षिप्तपरिचयं हिन्दीभाषया लिखत। 4

## खण्डः – 'घ'

### (छन्दोऽलङ्कार-परिचयः)

**5.** प्रदत्तछन्दस्सु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) अनुष्टुप्,

(ii) वंशस्थम्,

(iii) उपजातिः,

(iv) मन्दाक्रान्ता।

**6.** प्रदत्त-अलंकारेषु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) उपमा,

(ii) अर्थान्तरन्यासः,

(iii) अनुप्रासः

(iv) उत्प्रेक्षा।



Downloaded from cclchapter.com

## खण्डः – 'ङ'

### (अनुप्रयुक्त-व्याकरणम्)

**7.** (क) कर्म ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) स्वरसन्धेः ***अथवा*** अयादिसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) अव्ययीभाव ***अथवा*** द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

## खण्डः – 'च'

### (पठित-अवबोधनम्)

**8.** अधोलिखितगद्यांशस्य सप्रसंगं सरलार्थं लिखत – 4

(क) ततो राजावदत्, 'भो ब्राह्मण ! भवान् यज्ञदक्षिणाकालं व्यतिक्रम्य आगतः। मया सर्वोऽपि ब्राह्मणसमूहो दक्षिणया तोषितः। तर्हि त्वमेतेषां रत्नानां मध्ये यत्तुभ्यं रोचते तद्गृहाणेति।

**अथवा**

(ख) स्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य परमधर्मः। स प्रतिमासं प्रथमदिवसे स्ववेतनस्य अर्धाधिकं भागं केरलं प्रेषयति स्म। तेनानुमीयते तस्य राज्येन सह अस्ति कश्चित् सम्पर्कः।

**9.** प्रदत्तश्लोकस्य सप्रसंगं सरलार्थं लिखत – 4

(क) असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

**अथवा**

(ख) सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।



Downloaded from cclchapter.com

**10.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषया लिखत – $2 \times 2 = 4$

(क) अपरिणामोपशमो दारुणो लक्ष्मीमदः।

(ख) सुलभसौख्यमिदानीं बालत्वं भवति।

(ग) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

(घ) कोटीश्चतस्रो दश चाहर।

**11.** प्रदत्तगद्यांशं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत – $2 \times 1 = 2$

मयानुभूतमस्ति यदयं कुटिलः 'किन्तुः' नानादेशेषु नानारूपाणि सन्धार्य गुप्तं विचरति। यथैव लोकानां कार्यसिद्धेरवसरः समुपतिष्ठते तथैवायं प्रकटीभूय लोकानां कार्याणि यथावस्थितमवरुणाद्धि।

***प्रश्नौ :-***

(क) कः लोकानां कार्याणि अवरुणद्धि ?

(ख) 'यथैव' इत्यस्मिन् पदे कः सन्धिः ?

**12.** प्रदत्तश्लोकं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत – $2 \times 1 = 2$

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।

लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि।।

***प्रश्नौ :-***

(क) जनकादयः केनैव संसिद्धिमास्थिताः ?

(ख) 'संपश्यन्' इत्यस्मिन् पदे कः धातुः ?



Downloaded from cclchapter.com

**13.** रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत – $2 \times 1 = 2$

(क) दिदेश <u>कौत्साय</u> समस्तमेव।

(ख) तावदकस्मादुत्थितो महान् <u>झञ्झावातः</u>।

**खण्डः – 'छ'**

**(लघूत्तरात्मकप्रश्नाः)**

**14.** मञ्जूषागतं पदम् आधृत्य वाक्यं पूरयत – $4 \times 1 = 4$

(i) रामः ........... सह वनमगच्छत्। (सीताम्/सीतया)

(ii) ............ नमः। (गुरुम्/गुरुभ्यः)

(iii) सः .......... खञ्जः। (पादेन/पादात्)

(iv) ............. परितः वृक्षाः सन्ति। (विद्यालयम्/विद्यालयस्य)

**खण्डः – 'ज'**

**(बहुविकल्पीयप्रश्नाः)**

**15.** प्रदत्तविकल्पेषु ***शुद्धम्*** उत्तरं चीयताम् – $12 \times 1 = 12$

(क) 'हिंसावृत्तिः' इत्यत्र विग्रहः अस्ति –

(i) हिंसाः वृत्तिः (ii) हिंसायाः वृत्तिः

(iii) हिंसां वृत्तिः (iv) हिंसात् वृत्तिः

(ख) 'शान्तिश्च सुखं च' इत्यत्र समस्तपदं भवति –

(i) शान्तिसुखम् (ii) शान्तिसुखे

(iii) शान्तिसुखानि (iv) शान्तिसुखः



Downloaded from cclchapter.com

(ग) 'महान्धकारः' इत्यत्र समासः अस्ति –

(i) कर्मधारयः (ii) द्वन्द्वः

(iii) द्विगुः (iv) बहुव्रीहिः

(घ) 'अनार्या' इत्यस्य विग्रहः अस्ति –

(i) न आर्यः (ii) अनार्या या

(iii) न आर्या (iv) अनार्यः या

(ङ) 'स्वल्पम्' इत्यस्य सन्धिच्छेदः अस्ति –

(i) स्व + अल्पम् (ii) सु + अल्पम्

(iii) स् + वल्पम् (iv) सू + अल्पम्

(च) 'कः + अपि' इत्यस्य सन्धिपदं भवति –

(i) कोऽपि (ii) कोपि

(iii) किमपि (iv) कपि

(छ) 'तत् + धावतः' इत्यस्य सन्धिपदं भवति –

(i) तत्धावतः (ii) तध्दावतः

(iii) तद्धावतः (iv) तद्वावतः

(ज) 'हिंसावृत्तिस्तु' इत्यस्य सन्धिच्छेदः किम् ?

(i) हिंसावृत्तिम् + तु (ii) हिंसावृत्तिः + तु

(iii) हिंसावृत्तिं + तु (iv) हिसांवृत्तिः + अस्तु



Downloaded from cclchapter.com

(झ) 'वि + कृ + ल्यप्' संयोगेन रूपम् –

(i) विकित्य (ii) विकृत्वा

(iii) विकृय (iv) विकृत्य

(ञ) 'कुर्वाणः' इत्यस्य प्रकृतिप्रत्ययौ स्तः –

(i) कुर् + आणः (ii) कुर् + वाणः

(iii) कृ + आणः (iv) कृ + शानच्

(ट) 'सिद्धम्' इत्यत्र प्रकृतिप्रत्ययौ स्तः –

(i) सिद् + क्त (ii) सिध् + क्तवतु

(iii) सिध् + क्तिन् (iv) सिध् + क्त

(ठ) 'उप + दिश् + तव्यत्' इत्यस्य सिद्धपदम् अस्ति –

(i) उपदेष्टव्यम् (ii) उपदेशनीयम्

(iii) उपदिष्टव्यम् (iv) उपदिष्टम्



Downloaded from cclchapter.com

**CLASS : 12th (Sr. Secondary)** **Code No. 205**

**Series : SS/Annual-2023**

रोल नं० | | | | | | | | | | |

***SET : B***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घंटे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **15** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***सामान्य निर्देश :***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



Downloaded from cclchapter.com

### खण्डः – 'क'

### (अपठित-अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नांकितप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत -

पुरा ययातिः राजा आसीत्। तस्य सुखसाधनानि पूर्णतः उपलब्धानि आसन्। स नानाविधान् भोगान् उपभुज्य आत्मानं सन्तृप्तं विधातुमिच्छति स्म। तस्य प्रयत्नः प्रशंसनीयः आसीत्, परन्तु सः इन्द्रियाणां तृप्तिं विधातुम् असमर्थो जातः। अन्ते राजा भर्तृहरिवचनम् अनुभूतवान् यत् - भोगान् भुञ्जानः न कोऽपि सुखी भवेत्। भोगैः शान्तिर्न प्राप्यते, अपितु त्यागात् हि सर्वसुखमनुभूयते।

***प्रश्ना :-*** $5 \times 2 = 10$

(क) ययातिः कः आसीत् ?

(ख) कैः शान्तिर्न प्राप्यते ?

(ग) त्यागात् किमनुभूयते ?

(घ) किं राजा इन्द्रियाणां तृप्तिं विधातुं समर्थो जातः ?

(ङ) 'विधातुम्' इत्यस्मिन् पदे कः प्रत्ययः ?

### खण्डः – 'ख'

### (रचनात्मकं-कार्यम्)

**2.** ***एकं*** लघुनिबन्धं संस्कृतभाषया रचयत - 6

(क) मम विद्यालयः,

(ख) स्वच्छतायाः महत्त्वम्

(ग) प्रातः भ्रमणम्



Downloaded from cclchapter.com

## खण्डः – 'ग'

### (संस्कृत-साहित्य-परिचयः)

**3.** अम्बिकादत्त व्यासस्य ***अथवा*** भवभूतेः संक्षिप्तपरिचयं हिन्दीभाषया लिखत। 4

**4.** सिंहासन द्वात्रिंशिकायाः ***अथवा*** प्रबन्धमञ्जरीकाव्यस्य संक्षिप्तपरिचयं हिन्दीभाषया लिखत। 4

## खण्डः – 'घ'

### (छन्दोऽलङ्कार-परिचयः)

**5.** प्रदत्तछन्दस्सु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) वसन्ततिलका

(ii) इन्द्रवज्रा

(iii) शिखरिणी

(iv) वंशस्थम्

**6.** प्रदत्त-अलंकारेषु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) रूपकम्

(ii) अतिशयोक्तिः

(iii) श्लेषः

(iv) उत्प्रेक्षा



Downloaded from cclchapter.com

**खण्डः – 'ङ'**

**(अनुप्रयुक्त-व्याकरणम्)**

**7.** (क) कर्तृकारकस्य ***अथवा*** अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) दीर्घसन्धेः ***अथवा*** यण्सन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) तत्पुरुषसमासस्य ***अथवा*** द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः – 'च'**

**(पठित-अवबोधनम्)**

**8.** अधोलिखितगद्यांशस्य सप्रसंगं सरलार्थं लिखत – 4

(क) अहो असारोऽयं संसारः, कदा कस्य किं भविष्यतीति न ज्ञायते। यच्चोपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति।

**अथवा**

(ख) ते सप्तगगनाश्रिताः सप्त ग्रहाः स्वर्गं परितो मेखलावत् परिभ्रमन्तीति वदन्ति, न स्वर्गस्योपरि।

**9.** प्रदत्तश्लोकस्य सप्रसंगं सरलार्थं लिखत – 4

(क) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।

**अथवा**

(ख) केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।



Downloaded from cclchapter.com

**10.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषया लिखत – $2 \times 2 = 4$

(क) दिदेश कौत्साय समस्तमेव।

(ख) दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्त्तव्यः।

(ग) विद्ययाऽमृतमश्नुते।

(घ) अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः।

**11.** प्रदत्तगद्यांशं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत – $2 \times 1 = 2$

मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतमा सृष्टिः, जीवसृष्टिप्रवाहेषु मानवा इव पर-प्रतारकाः स्वार्थसाधनपरा मायाविनः कपटव्यवहारकुशलाः हिंसानिरताः जीवाः न विद्यन्ते।

***प्रश्नौ :–***

(क) का नाम सर्वासु सृष्टिधारासु निकृष्टतमा सृष्टिः ?

(ख) 'सर्वासु' अत्र का विभक्तिः किं वचनञ्च ?

**12.** प्रदत्तश्लोकं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत – $2 \times 1 = 2$

तमध्वरे विश्वजिति क्षितीशं

निःशेषविश्राणितकोषजातम्।

उपात्तविद्यो गुरुदक्षिणार्थी

कौत्सः प्रपेदे वरतन्तुशिष्यः।

***प्रश्नौ :–***

(क) विश्वजिति अध्वरे कः प्रपेदे ?

(ख) 'वरतन्तुशिष्यः' अत्र कः समासः ?



Downloaded from cclchapter.com

**13.** रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत – $2 \times 1 = 2$

(क) मन्त्रिणां मध्येऽपि तस्य सुख्यातिः वर्तते।

(ख) जलमध्ये पुष्पाञ्जलिं दत्त्वा क्षणं स्थितः।

## खण्डः – 'छ'

## (लघूत्तरात्मकप्रश्नाः)

**14.** मञ्जूषागतं पदम् आधृत्य वाक्यं पूरयत – $4 \times 1 = 4$

(i) .......... परितः वृक्षाः सन्ति। (ग्रामं/ग्रामात्)

(ii) सा ......... सह गच्छति। (मम/मया)

(iii) ............ काणः। (नेत्राभ्याम्/नेत्रेण)

(iv) .......... नमः। (शिवं/शिवाय)

## खण्डः – 'ज'

## (बहुविकल्पीयप्रश्नाः)

**15.** प्रदत्तविकल्पेषु ***शुद्धम्*** उत्तरं चीयताम् – $12 \times 1 = 12$

(क) 'स्वोदरपूर्तिम्' इत्यस्य विच्छेदः अस्ति –

(i) सु + उदरपूर्तिम् (ii) सु + ओदरपूर्तिम्

(iii) स्व + उदरपूर्तिम् (iv) स्वो + दरपूर्तिम्

(ख) 'तत्र + एव + अस्य' इत्यस्य सन्धिपदम् भवति –

(i) तत्रेवऽस्य (ii) तत्रैवास्य

(iii) तत्रैवस्य (iv) तत्रावास्य



Downloaded from cclchapter.com

(ग) 'आहुः + अविद्यया' इत्यस्य सन्धिपदं किम् ?

(i) आहुरविद्यया (ii) आहुसविद्यया

(iii) आहुषविद्यया (iv) आहुर्विद्यया

(घ) 'तांस्ते' इत्यस्य सन्धिच्छेदः किम् ?

(i) तान् + ते (ii) तान् + आस्ते

(iii) तम् + ते (iv) ताः + ते

(ङ) 'मेघमाला' इत्यस्य विग्रहः अस्ति -

(i) मेघेषु माला (ii) मेघ इव माला

(iii) मेघानां माला (iv) मेघाः माला

(च) 'महान् चासौ अन्धकारः' अत्र समस्तपदम् भवति -

(i) महदन्धकारः (ii) महन्धकारः

(iii) महानान्धकारः (iv) महान्धकारः

(छ) 'उपात्तविद्यः' इत्यत्र समासः वर्तते -

(i) बहुव्रीहिः (ii) द्विगुः

(iii) कर्मधारयः (iv) तत्पुरुषः

(ज) 'मुखम् एव पुण्डरीकम्' इत्यस्य समस्तपदम् भवति -

(i) मुखपुण्डरीकः (ii) पुण्डरीकमुखः

(iii) मुखपुण्डरीकम् (iv) मुखपुण्डरीका



Downloaded from cclchapter.com

(झ) 'वि + धा + ल्यप्' योगेन सिद्धपदम् भवति -

(i) विधाय (ii) विधाल्य

(iii) विधाता (iv) विधत्य

(ञ) 'उत्थितः' अत्र प्रकृतिप्रत्ययाः सन्ति -

(i) उत् + थित् + क्त (ii) उत् + स्थित् + क्त

(iii) उत् + स्था + क्त (iv) उत् + तिष्ठ् + क्त

(ट) 'पटु + तल्' इत्यस्य योगेन रूपं भवति -

(i) पटुता (ii) पटुतः

(iii) पटुतम् (iv) पटुतरः

(ठ) 'उपत्यकातः' इत्यस्य प्रकृतिप्रत्ययौ स्तः -

(i) उपत्य + कातः (ii) उपत्यका + तः

(iii) उपत्यका + तसिल् (iv) उपत्यका + अतः



Downloaded from cclchapter.com

**CLASS : 12th (Sr. Secondary)** **Code No. 205**

**Series : SS/Annual-2023**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घंटे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **15** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***सामान्य निर्देश :***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



Downloaded from cclchapter.com

## खण्डः – 'क'

### (अपठित-अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नांकितप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत -

एकदा महर्षिः गौतमः बाणविद्यायाः अभ्यासं कर्तुम् उद्यतोऽभवत्। तस्य पत्नी अहिल्या दूरं गतान् बाणान् सञ्चित्य, आनीय च तस्मै ददाति स्म। एकवारं सा विलम्बेन प्रत्यागतवती। तीव्रातपे तस्याः चरणे तप्ते जाते आस्ताम्। विश्रामार्थं सा वृक्षच्छायायाम् उपविष्टवती। महर्षिः सूर्यदेवस्योपरि क्रुद्धः जातः। सूर्यः ब्राह्मणवेषत्वेन समागत्य तस्मै छत्रं पादत्राणे च अददात्। एतत् उपकरणद्वयं तदारभ्य हि लोके प्रचलितं वर्तते।

***प्रश्ना :-*** $5 \times 2 = 10$

(क) महर्षिः गौतमः किं कर्तुम् उद्यतोऽभवत् ?

(ख) महर्षेः पत्न्याः किं नाम आसीत् ?

(ग) महर्षिः कस्योपरि रुष्टोऽभवत् ?

(घ) किमर्थं अहिल्या वृक्षच्छायायाम् उपविष्टवती ?

(ङ) 'जातः' इत्यत्र कः धातुः कश्च प्रत्ययः ?

## खण्डः – 'ख'

### (रचनात्मकं-कार्यम्)

**2.** ***एकं*** लघुनिबन्धं संस्कृतभाषया रचयत - 6

(क) मम प्रियं पुस्तकम्

(ख) समयस्य सदुपयोगः

(ग) स्वामी विवेकानन्दः



Downloaded from cclchapter.com

## खण्डः – 'ग'

### (संस्कृत-साहित्य-परिचयः)

**3.** कविकालिदास्य ***अथवा*** पं० हृषीकेशभट्टाचार्यस्य संक्षिप्तपरिचयं हिन्दीभाषया लिखत। 4

**4.** समुद्रसंगमस्य ***अथवा*** उत्तररामचरितस्य संक्षिप्तपरिचयं हिन्दीभाषया लिखत। 4

## खण्डः – 'घ'

### (छन्दोऽलङ्कार-परिचयः)

**5.** प्रदत्तछन्दस्सु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) उपजातिः

(ii) अनुष्टुप्

(iii) मन्दाक्रान्ता

(iv) शार्दूलविक्रीडितम्

**6.** प्रदत्त-अलंकारेषु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) उपमा

(ii) यमकम्

(iii) अनुप्रासः

(iv) व्याजस्तुतिः



Downloaded from cclchapter.com

## खण्डः – 'ङ'

### (अनुप्रयुक्त-व्याकरणम्)

**7.** (क) करणकारकस्य ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) गुणसन्धेः ***अथवा*** व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) तत्पुरुषस्य ***अथवा*** द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

## खण्डः – 'च'

### (पठित-अवबोधनम्)

**8.** अधोलिखितगद्यांशस्य सप्रसंगं सरलार्थं लिखत – 4

(क) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोष-घर्घरानुनादिना स्वरेण च रामभद्रमनुसरति।

**अथवा**

(ख) भवा दृशा एव भवन्ति भाजनान्युपदेशानाम्।

अपगतभले हि मनसि विशन्ति सुखेनोपदेशगुणाः।

**9.** प्रदत्तश्लोकस्य सप्रसंगं सरलार्थं लिखत – 4

(क) पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति
आपद्गतं च न जहाति ददाति काले,
सन्मित्रलक्षणभिदं प्रवदन्ति सन्तः।।

**अथवा**

(ख) ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।



Downloaded from cclchapter.com

**10.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषया लिखत – 2 × 2 = 4

(क) असारोऽयं संसारः।

(ख) विभूषणं मौनमपण्डितानाम्।

(ग) मनुष्याणां हिंसावृत्तिस्तु निरवधिः।

(घ) योगः कर्मसु कौशलम्।

**11.** प्रदत्तगद्यांशं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत – 2 × 1 = 2

एतेषां सप्तद्वीपानां प्रत्येकमावेष्टनरूपाः सप्तसमुद्राः। लवणो जम्बुद्वीपस्यावरकः। इक्षुरसः प्लक्षद्वीपस्य, दधिसमुद्रः क्रौञ्चद्वीपस्य, क्षीरसमुद्रः शाकद्वीपस्य, स्वादुजलसमुद्रः पुष्करद्वीपस्यावरकः इति।

***प्रश्नौ :-***

(क) शाकद्वीपस्य आवरकः कः ?

(ख) समुद्राः कति सन्ति ?

**12.** प्रदत्तश्लोकं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत – 2 × 1 = 2

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।

***प्रश्नौ :-***

(क) किं कश्चित् अकर्मकृत् तिष्ठति ?

(ख) 'गुणैः' इत्यत्र का विभक्तिः किं वचनं च ?



Downloaded from cclchapter.com

**13.** रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत - 2 × 1 = 2

(क) जगाद भूयो जगदेकनाथः।

(ख) राजवचनमनुगच्छति जनो भयात्।

**खण्डः – 'छ'**

**(लघूत्तरात्मकप्रश्नाः)**

**14.** मञ्जूषागतं पदम् आधृत्य वाक्यं पूरयत - 4 × 1 = 4

(i) .......... उभयतः वृक्षाः सन्ति। (ग्रामं/ग्रामात्)

(ii) .......... नमः। (सर्वान्/सर्वेभ्यः)

(iii) सः .......... विना गृहं न गच्छति। (तम्/तस्य)

(iv) मोहनः गृहं ........... गच्छति। (प्रति/प्रतिम्)

**खण्डः – 'ज'**

**(बहुविकल्पीयप्रश्नाः)**

**15.** प्रदत्तविकल्पेषु ***शुद्धम्*** उत्तरं चीयताम् - 12 × 1 = 12

(क) 'जिजीविषेच्छतम्' इत्यस्य सन्धिच्छेदः अस्ति -

(i) जिजीविषेत् + शतम् (ii) जिजीविषा + छतम्

(iii) जिजीविषेत् + छतम् (iv) जिजीविषा + शतम्

(ख) 'एव + अतिगहनम्' इत्यत्र सन्धिपदं भवति -

(i) एवातिगहनम् (ii) एवतिगहनम्

(iii) एतिगहनम् (iv) एवैतिगहनम्



Downloaded from cclchapter.com

(ग) 'कः + अपि' इत्यस्य सन्धिपदं किम् ?

(i) कोऽपि (ii) केऽपि

(iii) कापि (iv) कसपि

(घ) 'अभिरुचिर्व्यसनम्' इत्यस्य विच्छेदः भवति -

(i) अभिरुचिः + व्यसनम् (ii) अभिरुचेः + व्यसनम्

(iii) अभिरुचिम् + व्यसनम् (iv) अभिरुचिं + व्यसनम्

(ङ) 'समाप्तविद्यः' इत्यस्य विग्रहवाक्यं भवति -

(i) समाप्तः विद्यः येन सः (ii) समाप्ता विद्या येन सः

(iii) समाप्तं विद्यां येन सः (iv) समाप्ता विद्यः येन सः

(च) 'महान्तः पादपाः' इत्यत्र समस्तपदं भवति -

(i) महापादपाः (ii) माहपादपाः

(iii) महपादपाः (iv) मोहपादपाः

(छ) 'न प्रतिहता' इत्यस्य समस्तपदं किम् ?

(i) अप्रतिहता (ii) अप्रतिहताः

(iii) अप्रतिहतः (iv) अनप्रतिहता

(ज) 'वाक्पटुता' इत्यस्य विग्रहवाक्यं भवति -

(i) वाचि पटुता (ii) वाचा पटुता

(iii) वाचे पटुता (iv) वाचं पटुता



Downloaded from cclchapter.com

(झ) 'सम् + चि + ल्यप्' योगेन रूपं भवति –

(i) सञ्चित्य (ii) समचित्य

(iii) समचीय (iv) सञ्चीय

(ञ) 'पश्यन्' इत्यत्र प्रकृतिप्रत्ययौ स्तः –

(i) पश्य् + शतृ (ii) पश्य् + अन्

(iii) दृश् + शतृ (iv) दृश् + अन्

(ट) 'दैष्टिक + तल्' इत्यस्य योगेन रूपं भवति –

(i) दैष्टिकतम् (ii) दैष्टिकतः

(iii) दैष्टिकता (iv) दैष्टिकम्

(ठ) 'ततः' इत्यस्य प्रकृतिप्रत्ययौ स्तः –

(i) तद् + तसिल् (ii) तद् + अस्

(iii) तद् + असुन् (iv) तद् + क्त



Downloaded from cclchapter.com

**CLASS : 12th** (Sr. Secondary) **Code No. 205**

**Series : SS/Annual-2023**

*रोल नं०* | | | | | | | | | | | **SET : D**

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घंटे]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **15** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***सामान्य निर्देश :***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



Downloaded from cclchapter.com

**खण्डः – 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नांकितप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

एकदा मणिसुन्दरः नाम कश्चित् युवकः ग्रामप्रमुखस्य कार्यालये उद्योगं प्राप्तवान्। ततः अचिरात् तस्य विवाहः अपि अभवत्। तस्य पत्न्याः नाम 'कमला' इति। पार्श्व-गृहस्थानां धनिकत्वं दृष्ट्वा कमला असूयाम् असन्तोषं च प्राप्नोति स्म। अतः सा – 'वस्त्राणि आभरणानि च आनीय ददातु' इति उक्त्वा सदा पतिं पीडयति स्म। पत्न्याः एतादृशपीडायाः कारणतः मणिसुन्दरः कार्यालये श्रद्धया कार्यं कर्तुं न शक्तवान्।

***प्रश्ना :-*** $5 \times 2 = 10$

(क) कार्यालये कः उद्योगं प्राप्तवान् ?

(ख) मणिसुन्दरस्य पत्न्याः नाम किम् आसीत् ?

(ग) कमला किं दृष्ट्वा असूयां प्राप्नोति स्म ?

(घ) मणिसुन्दरः किमर्थं कार्यं कर्तुं न शक्तवान् ?

(ङ) 'कर्तुम्' इत्यत्र कः धातुः कश्च प्रत्ययः ?

**खण्डः – 'ख'**

**(रचनात्मकं-कार्यम्)**

**2.** ***एकं*** लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) संस्कृतभाषायाः महत्त्वम्।

(ख) स्वच्छतायाः महत्त्वम्।

(ग) प्रातः भ्रमणम्।



Downloaded from cclchapter.com

## खण्डः – 'ग'

### (संस्कृत-साहित्य-परिचयः)

**3.** महाकवेः भवभूतेः ***अथवा*** दाराशिकोहस्य संक्षिप्त परिचयंहिन्दीभाषया लिखत। 4

**4.** शिवराजविजयस्य ***अथवा*** समुद्रसंगमस्य संक्षिप्त परिचयंहिन्दीभाषया लिखत। 4

## खण्डः – 'घ'

### (छन्दोऽलङ्कार-परिचयः)

**5.** प्रदत्तछन्दस्सु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) इन्द्रवज्रा

(ii) वसन्ततिलका

(iii) शिखरिणी

(iv) शार्दूलविक्रीडितम्

**6.** प्रदत्त-अलंकारेषु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) अनुप्रासः

(ii) यमकम्

(iii) अर्थान्तरन्यासः

(iv) श्लेषः



Downloaded from cclchapter.com

## खण्डः – 'ङ'

## (अनुप्रयुक्त-व्याकरणम्)

**7.** (क) सम्प्रदानकारकस्य ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) वृद्धिसन्धेः ***अथवा*** अयादिसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) अव्ययीभावसमासस्य ***अथवा*** तत्पुरुषसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

## खण्डः – 'च'

## (पठित-अवबोधनम्)

**8.** अधोलिखितगद्यांशस्य सप्रसंगं सरलार्थं लिखत – 4

(क) मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतमा सृष्टिः, जीवसृष्टिप्रवाहेषु मानवा इव परप्रतारकाः स्वार्थसाधनपरा मायाविनः कपटव्यवहारकुशलाः हिंसारताः जीवाः न विद्यन्ते।

**अथवा**

(ख) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। न ह्येवंविधमपरिचितमिह जगति किञ्चिदस्ति यथेयमनार्या।

**9.** प्रदत्तश्लोकस्य सप्रसंगं सरलार्थं लिखत – 4

(क) बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।

**अथवा**

(ख) विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्।।



Downloaded from cclchapter.com

**10.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषया लिखत - $2 \times 2 = 4$

(क) अस्माभिः पर्वताः शंकवः कृता।

(ख) अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।

(ग) देहं वा पातयेयं कार्यं वा साधयेयम्।

(घ) दातव्यं भोक्तव्यं धनविषये संचयः न कर्त्तव्यः।

**11.** प्रदत्तगद्यांशं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत - $2 \times 1 = 2$

कुटिलेनामुना 'किन्तु' ना कियत्कालात् क्लेशितोऽस्मि। यत्र यत्राहं गच्छामि तत्र तत्रैवास्य शत्रुता सम्मुखास्थिता भवति।

***प्रश्नौ :-***

(क) कस्य शत्रुता सम्मुखस्थिता भवति ?

(ख) 'गच्छामि' इति पदे कः धातुः कश्च लकारः ?

**12.** प्रदत्तश्लोकं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत - $2 \times 1 = 2$

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यास्विद्धनम्।

***प्रश्नौ :-***

(क) भोगः कथं करणीयः ?

(ख) 'तेन' इति पदे का विभक्तिः किञ्च वचनम् ?

**13.** रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) केयूराणि न भूषयन्ति <u>पुरुषम्</u>।

(ख) शूरं <u>कण्टकमिव</u> परिहरति।



Downloaded from cclchapter.com

**खण्डः – 'छ'**

**(लघूत्तरात्मकप्रश्नाः)**

**14.** मञ्जूषागतं पदम् आधृत्य वाक्यं पूरयत – $4 \times 1 = 4$

(i) .......... विना जीवनं नास्ति। (जलं/जलस्य)

(ii) सः ......... सह क्रीडति। (मम/मया)

(iii) ............ मोदकं रोचते। (तम्/तस्मै)

(iv) ........... उभयतः जलमस्ति। (ग्रामम्/ग्रामस्य)

**खण्डः – 'ज'**

**(बहुविकल्पीयप्रश्नाः)**

**15.** प्रदत्तविकल्पेषु ***शुद्धम्*** उत्तरं चीयताम् – $12 \times 1 = 12$

(क) 'सुकृतं च दुष्कृतं च' इत्यत्र समस्तपदं भवति –

(i) सुकृतदुष्कृते (ii) सुकृतदुष्कृतौ

(iii) सुकृतदुष्कृतम् (iv) सुकृतदुष्कृतेः

(ख) 'कुलव्रतम्' इत्यत्र विग्रहवाक्यम् अस्ति –

(i) कुलस्य व्रतः (ii) कुलस्य व्रतम्

(iii) कूलस्य व्रतः (iv) कूलस्य व्रतम्

(ग) 'अहर्निशम्' पदे समासः वर्तते –

(i) द्वन्द्वः (ii) बहुव्रीहिः

(iii) तत्पुरुषः (iv) द्विगुः



Downloaded from cclchapter.com

(घ) 'अनवाप्य' इत्यस्य विग्रहवाक्यम् अस्ति –

(i) न अवाप्य (ii) न अवाप्तम्

(iii) न अवाप्तः (iv) नैव अवाप्तः

(ङ) 'महा + ऋषिः' इत्यस्य सन्धिपदम् भवति –

(i) महार्षिः (ii) महर्षिः

(iii) महषिः (iv) महाषिः

(च) 'अन्यथेतः' इत्यस्य विच्छेदः अस्ति –

(i) अन्यथ + इतः (ii) अन्यथा + एतः

(iii) अन्यथा + इतः (iv) अन्यथ + एतः

(छ) 'पुरुषः + अश्नुते' इत्यस्य सन्धिपदम् भवति –

(i) पुरुषोऽश्नुते (ii) पुरुषाश्नुते

(iii) पुरुषश्नुते (iv) पुरुषेऽश्नुते

(ज) 'तदनुवर्तते' इत्यस्य सन्धिच्छेदः भवति –

(i) तत् + अनुवर्तते (ii) ततः + अनुवर्तते

(iii) तदनु + वर्तते (iv) तदा + अनुवर्तते

(झ) 'वस् + शतृ' योगेन किं रूपं भवति ?

(i) वसन् (ii) वसन्त्

(iii) वसन्त (iv) वस्तन्



Downloaded from cclchapter.com

(ञ) 'प्रेत्य' इत्यस्य प्रकृतिप्रत्ययाः सन्ति –

(i) प्र + एत् + य (ii) प्र + इण् + ल्यप्

(iii) प्र + इण् + यत् (iv) प्र + इण् + तव्यत्

(ट) 'गत्वा' इत्यस्य प्रकृतिप्रत्ययौ स्तः –

(i) गम् + क्त्वा (ii) गच्छ् + क्त्वा

(iii) गम् + क्त (iv) गच्छ् + क्त

(ठ) 'तत् + तसिल्' इत्यस्य पदं भवति –

(i) ततः (ii) तत्तसि

(iii) तत्तः (iv) तत्ताः



Downloaded from cclchapter.com